# इकाई – 3
# पत्रलेखनम्

**इकाई की रूपरेखा**


3.1 परिचय

3.2 इकाई के उद्देश्य

3.3 पत्रलेखनम्

3.4 अपनी प्रगति जांचिए

3.5 सारांश

3.6 मुख्य शब्दावली

3.7 अपनी प्रगति जांचिए के उत्तर

3.8 अभ्यास हेतु प्रश्न

3.9 आप ये भी पढ़ सकते हैं


---

## 3.1 परिचय

पत्र–लेखन एक कला है। विषय–निरूपण के साथ–साथ निजी भावों के प्रदर्शन के लिए पत्र–लेखन एक सशक्त माध्यम है। संस्कृत में पत्र–लेखन की परम्परा अति प्राचीन काल की पत्र–लेखन की प्रणाली आज की लेखन प्रणाली से पूर्णतया भिन्न थी। उस समय पत्र–लेखन का आरम्भ 'स्वस्ति' अथवा 'शुभमस्तु' से किया जाता था। फिर जहाँ से पत्र लिखा गया है, जिसने पत्र लिखा है, जहाँ पर पत्र भेजना है तथा जिसको पत्र लिखना है – इन सब बातों का एक ही वाक्य में उल्लेख होता था। परन्तु वर्तमान समय में हिन्दी तथा अंग्रेजी भाषा में लिखे जाने वाले पत्रों के समान संस्कृत भाषा में भी पत्र लिखे जाने लगे हैं।

## 3.2 इकाई के उद्देश्य

पत्र–लेखन की कला में समर्थ हो सकेंगे;

पत्र–लिखते समय कौन–कौन सी महत्त्वपूर्ण बातें याद रखनी चाहिए इससे अवगत हो सकेंगे;

सामान्य रूप से पत्र कितने प्रकार के होते है इसका वर्णन कर पाएंगे;

सरल विषयों पर संस्कृत में पत्र–लेखन कार्य करने में प्रवीण हो सकेंगे;

प्राचीन पत्र–लेखन प्रणाली तथा वर्तमान पत्र–लेखन प्रणाली के अन्तर से अवगत हो सकेंगे।

## 3.3 पत्रलेखनम्

संस्कृत भाषा में पत्र लिखते समय निम्नलिखित बातों का अवश्य ध्यान रखें –

पत्र की भाषा सरल एवं स्पष्ट होनी चाहिए।

इसमें प्रायः वार्तालाप में व्यवहृत भाषा का ही रूप अपनाया जाना चाहिए, जिससे पत्र का भाव सरलता से हृदयंगम हो सके।

पत्र चाहे किसी को भी लिखा गया हो, कम से कम शब्दों में अधिक से अधिक विचार व्यक्त करने चाहिए।

जिस उद्देश्य के लिए पत्र लिखा गया हो, उसका स्पष्ट उल्लेख होना चाहिए।

अति संक्षिप्त भी पत्र भी होना चाहिए, अपितु सरल एवं सारयुक्त शैली में पत्र लिखना चाहिए।

पत्र में अनावश्यक विशेषणों का परित्याग करना चाहिए। पाण्डित्य–प्रदर्शन का प्रयत्न पत्र में अनुचित होता है, क्योंकि यह निबन्ध आदि का विषय है।

साधारणतया पत्रों को तीन श्रेणी में बाँट सकते हैं। तदनुसार ही उनका लेखन होता है। (क) प्रार्थना पत्र (ख) घरेलू पत्र (ग) कार्यालयी पत्र।

जो पत्र किसी अधिकारी या प्राचार्य आदि को किसी कार्य को पूरा करने के लिए प्रार्थना करते हुए लिखे जाते हैं उन्हें प्रार्थना–पत्र कहते हैं।

जो पत्र माता–पिता, भाई–बहन या अन्य सम्बन्धियों या मित्रों के लिखें जाते हैं, उन्हें घरेलू पत्र कहते हैं।

कार्यालय का आशय, किसी सरकारी, अर्द्धसरकारी आदि वह स्थान विशेष है जहाँ से प्रशासन का संचालन होता है। इसलिए इस प्रकार के पत्रों को शासकीय या प्रशासकीय पत्र भी कहते हैं।

**पत्र–लेखन विधि की सारणी**

| | यं प्रति | सम्बोधनम् | नमस्कारः / आशीर्वचनं / अभिवादनम् वा |
|---|---|---|---|
| 1 | मित्रं प्रति | प्रिय वयस्य ! | सस्नेहं नमस्ते |
| 2 | गुरुजनान् प्रति | परमपूज्यगुरुवर्याः ! | सादरं प्रणामाः |
| 3 | जनकं प्रति | परमपूज्यपितृमहाभागाः ! | सादरं प्रणमामि |
| 4 | अम्बां प्रति | परमपूज्ये अम्ब ! | सादरं चरणवन्दनानि |
| 5 | अनुजं प्रति | प्रिय अनुज ! | आशीर्वादाः |
| 6 | भगिनीं प्रति | प्रिये भगिनि ! | सस्नेहप्रणामाः |
| 7 | सखीं प्रति | प्रिये सखि ! | नमस्ते |
| 8 | शिष्यं प्रति | प्रिय शिष्य ! | शुभाशिषः |
| 9 | प्रकाशकं प्रति | श्रीमन्प्रकाशकमहोदयः | प्रणामाः |

इन पत्रों को संस्कृत में इस प्रकार प्रस्तुत किया जा सकता है –

**1. अवकाशार्थं प्रार्थनापत्रम्**

सेवायाम्

मान्यःप्राचार्यमहोदयः

राजकीय–महाविद्यालयः,

रोहतकः।

विषय : अवकाशार्थं प्रार्थनापत्रम्

श्रीमन्

सेवायां सविनयमिदमावेद्यते यन्मम ज्येष्ठभ्रातुः श्रीनारायणस्य वैशाखमासे शुक्लाष्टम्यां तिथौ विवाहः निश्चितोऽस्ति। वरयात्रा च हिसारं गमिष्यति। ममापि गमनं तत्रावश्यकं प्रतीयते। अतोऽहमष्टानां दिवसानामवकाशं याचे। आशासे ममावेदनमवश्यमेव स्वीकृतं भविष्यतीति।

प्रार्थयते,

राममेहरः,

स्नातक–तृतीय सामिसत्रं

अनुक्रमांक – 1870

दिनांक : 07/07/........

**2. शुल्क–क्षमार्थं प्राचार्याय प्रार्थना–पत्रम्**

सेवायाम्

श्रीमान् प्राचार्य–महोदयः

राजकीय–महाविद्यालयः,

गोहानानगरम्।

विषय : शुल्कक्षमार्थं प्रार्थनापत्रम्।

महोदयः,

सविनयं निवेदनं अस्ति यत् मम पूज्यः पिता एकस्मिन् कार्यालये लिपिकः अस्ति। मम पितुः वेतनेन परिवारस्य निर्वाहः अपि दुष्करः अस्ति। सः मम शिक्षा–शुल्कं दातुं पूर्णतः समर्थः न अस्ति। अतः अहं प्रार्थये मामनुकम्प्य मम शुल्कं क्षम्यताम्।

भवदीयः आज्ञाकारी शिष्यः

मुकेशः

स्नातक तृतीयसामिसत्रं,

अनुक्रमांक : 18

दिनांक : ...........

### 3. शुल्कदण्डक्षमार्थं प्राचार्य प्रति पत्रम्

सेवायाम्,

श्रीमान् प्राचार्य–महोदयः,

राजकीय–महाविद्यालयः,

सिरसा नगरम्।

विषय : शुल्क–दण्ड–क्षमार्थं प्रार्थनापत्रम्।

महोदय !

निवेदनं इदं यत् गते दिवसे यदा अहं महाविद्यालयं प्राप्तः, तदा मम समीपे अकस्मादेव प्रत्यभिज्ञानपत्रं (Identity Card) न आसीत्। ततोऽहं महाविद्यालयस्य शरीरशिक्षा–प्रमुखेन निगृहीतः। भवता च तदवलम्ब्य अहं पंचाशत्–रुप्यकशुल्कदण्डेन दण्डितः। अयं प्रथमः अवसरः अस्ति। अतः शुल्कदण्ड क्षमां करोतु।

भवदीयः आज्ञाकारी शिष्यः,

आनन्दकुमारः,

स्नातक–द्वितीयवर्षम्,

अनुक्रमांकः – 15,

तिथि : ........................

### 4. चरित्र–प्रमाणपत्रार्थं प्राचार्यमहोदयाय प्रार्थना–पत्रम्

सेवायाम्

श्रीमान् प्राचार्य–महोदयः,

राजकीय महाविद्यालयः,

अम्बाला नगरम्।

विषय : चरित्र–प्रमाणपत्रार्थं प्रार्थनापत्रम्।

श्रीमन्,

निवेदनं इदं यत् पूर्ववर्षे अहं महाविद्यालये स्नातक–कला–प्रथमवर्षे अध्ययनं कृतवान्। मम अनुक्रमांक 620 आसीत्। अकस्मात् मम पितृ–महोदयस्य स्थानान्तरम् अम्बालानगरात् भिवानी–नगरं अभवत्। तत्र महाविद्यालये प्रवेशार्थं माम् चरित्र– प्रमाणपत्रस्य आवश्यकता वर्तते। अतएव प्रार्थये यत् मह्यं चरित्र–प्रमाणपत्रं प्रदाय अनुग्रहं कुर्वन्तु भवन्तः।

धन्यवादेन सहितः

भवदीयः आज्ञाकारी शिष्य

रजकरामः,

तिथि : ..................

## 5. पुस्तकप्रेषणार्थं पुस्तकप्रकाशकं प्रति पत्रम्

सेवायाम्,

प्रकाशक–महोदयः,

गीताप्रेस, गोरखपुर

सैक्टर–2

रोहतकनगरम्

दिनांक : ..........

विषय : पुस्तकानि प्रेषणार्थं।

श्रीमन्,

सेवायाम् इदं निवेदनं यद् अहम् अधस्तनानि कानिचित् पुस्तकानि क्रेतुं इच्छामि यानि, मन्ये, भवत्सकाशात् सुलभानि। कृपया भवता तानि यथानिर्देशं मम सविधे अचिरात् प्रदेय–शुल्क–पार्सल द्वारेण (वी०पी०पी०) प्रेषणीयानि।

| | पुस्तकनाम् | लेखकनाम | प्रति |
|---|---|---|---|
| 1 | श्रीमद्भगवद्गीता | महर्षि व्यास | एका |
| 2 | रामायण | महर्षि वाल्मीकि | एका |
| 3 | श्रीरामचरितमानस | तुलसीदास | एका |

पूर्वतः सधन्यवादम्

भवदीयः,

बलवीरः।

## 6. उच्चशिक्षार्थं बैंकात् ऋणं गृहीतुं पत्रम्

सेवायाम्,

मुख्य–प्रबंधक महोदय,

भारतीय–स्टेट–बैंक,

रोहतक।

विषय : उच्च–शिक्षार्थं बैंक–ऋणार्थम्।

महोदयः,

अहं 'राजकीय–महाविद्यालयः, रोहतकः' स्थानीयस्य महाविद्यालयस्य छात्रः अस्मि। अस्मिन् वर्षे अहं स्नातक–अन्तिम–वर्षे 'महर्षि–दयानन्द– विश्वविद्यालये' प्रथमं स्थानं प्राप्तवान्। इदानीं एम०ए० कक्षायां प्रवेशार्थं विश्वविद्यालये पठितुं इच्छामि। धनाभावे अहं उच्च–अध्ययनं कर्तुं सर्वथा असमर्थोऽस्मि। अतएव अहं निवेदयामि यत् मह्यं एक–लक्ष–रूप्यकाणि ऋणरूपेण ऋणं अहं बैंक–नियमानुसारेण सब्याजं यथासमये निवर्तयिष्यामि। आशासे, एतत् ऋणं स्वीकृत्य भवान् माम् प्रति अनुग्रहं करिष्यति।

धन्यवादेन सहितः

भवदीयः प्रार्थी

पंकजः

184, शास्त्री नगर, रोहतकः

दिनांक : ....................

## 7. मित्राय भगिनीविवाहस्य निमंत्रणपत्रम्

514, सेक्टर–4

रोहतकः।

तिथि : .................

प्रियमित्र राहुल,

सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु। इदं प्रीतिदायकं वृत्तं भवन्तं सूचयित्वा अहम् अतीव आनन्दं अनुभवामि यत् मम भगिन्याः विवाहः अग्रिममास्य दशम्यां तारिकायां, बुधवासरे निश्चितः जातः। वरयात्रा हिसारात् आगमिष्यति। अहं त्वां प्रेमपूर्वक पूर्वतः एव ज्ञापयामि येन त्वम् अत्र त्रिचतुर्दिनानि पूर्वतः एव प्राप्तः स्याः। भवता पितृभ्यां सह अत्र अवश्यमेव आगन्तव्यम्। भवतां स्निग्धां संगतिं साहाय्यं च अहं कामये।

आदरणीयाभ्यां पितृभ्यां सस्नेह नमोनमः।

तत्र पत्रोत्तरं प्रतीक्षमाणः,

तव मित्रम्,

कृष्ण कुमारः।

## 8. पितुः पदोन्नति–विषयकं मित्रं प्रति पत्रम्

3, गोपालनगरम्

रोहतकनगरम्।

तिथि : ..................

प्रियमित्र रजकराम,

सस्नेहं नमोनमः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवच्चेतः प्रसादम् अधिगमिष्यति यत् मम पूज्याः पितृपादाः अधुना विद्यालयस्य प्राचार्यपदम् अलंकुर्वन्ति। तेषाम् इयं पदोन्नतिः सेवायां सानुमत्ता (सीनिऑरिटी) कारणात्, लोकप्रियताकारणात् स्वविषये नैपुण्यकारणात् च संजाता। आगामिनि रविवासरे अस्माभिः निमन्त्रिताः सर्वेऽपि प्राध्यापकाः जलपानार्थं मम गृहम् आगमिष्यन्ति। अस्मिन् अवसरे भवताऽपि अवश्यमेव आगन्तव्यम्। इदम्–मम निवेदनमस्ति।

भवदीयं मित्रम्,

अनिलकुमारः।

## 9. परीक्षा परिणामविषयकं पितरं प्रति पत्रम्

छात्रावासः,

राजकीयः महाविद्यालयः,

रोहतकनगरम्।

तिथि : ..........................

परमादरणीयाः पितृचरणाः,

सादरं प्रणामाः !

अत्र कुशलं तत्रास्तु। शुभसमाचारः अयं यत् मम परीक्षा परिणामः आगतः। भवतः आशीर्वादेन अहं परीक्षायां प्रथमश्रेणीं महाविद्यालये च प्रथमं स्थानं अलभे। समाचारपत्रेषु मम छायाचित्रम् अपि प्रकाशितम्। अहम् अग्रिममासे आगमिष्यामि। पूज्यायाः मातु चरणयोः मम प्रणामाः।

भवदीयः आज्ञाकारी पुत्रः,

सोमदत्तः।

**10. पित्रे रक्तदानशिविरविषयकं पत्रम्**

राजकीयः महाविद्यालयः,

गुरुग्रामः।

तिथिः : ................

पूज्य पितृमहोदय,

चरणवन्दना !

अत्र कुशलं तत्रास्तु। अद्याहं भवन्तं निवेदयामि यद् अस्माकं महाविद्यालये गते सप्ताहे रक्तदानशिविरम् आयोजितम्। अस्माकं कक्षाप्रमुखः अध्यापकः श्रीमान् बलवीराचार्यः शिविरस्य प्रमुखः आयोजकः आसीत्। सः प्रथमः स्वरक्तं प्रायच्छत्। तदनन्तरम् स्नातककक्षायाः पंचछात्रा एतस्मिन् शुभकार्ये अग्रसराः अभवन्। तेषाम् उत्साहं दृष्ट्वा मम मनसि अपि भावना संजाता तथा च मयाऽपि स्वरक्तम् प्रदत्तम्। आशासे यद् भवान् मम एतां भावनां दृष्ट्वा प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। चिन्तया अलम्।

भवदाज्ञाकारी,

रविप्रभातः।

**11. विवाहप्रस्तावस्य निषेधाय पित्रे पत्रम्**

10, धर्मनगरम्,

अम्बालाछावनी।

तिथिः .................

पूज्याः पितृमहोदयाः,

सादरं नमोनमः।

अत्र कुशलं तत्रास्तु। सविनयं निवेद्यते यत् भवद्भिः ममः पुरतः यो विवाहप्रस्तावः उपस्थापितः सः मे नाभिमतः। मया पूर्वम् अपि निजभावाः प्रकटिताः यद् अहं दौहित्रिकधनं (दहेज) लाभं श्रेयस्करं न मन्ये। अपरंच कारणम् इदमस्ति यद् अहम् तादृशीं कन्यां वरयितुम् अभिलषामि या सर्वविधगृहकर्मसु निपुणा भवेत्। श्रमप्रधाने अस्मांक गृहे धनाढ्यगृहाद् आगता बाला कथं व्यवहरिष्यति इति विचारणीयम्। नाहं भवदादेशानाम् उल्लंघनं करोमि तथापि आशासे यद् मम अस्वीकरणं युक्तियुक्तं मत्वा भवान् अपि तथैव आचरिष्यति इति।

भ्रातृभ्यः स्वसृभ्यश्च नमोनमः

भवदीयः प्रियः पुत्रः,

धर्मवीरः।

## 12. विदेशगतं मित्रं प्रति राष्ट्रियप्रेमविषयकं पत्रम्

6, पटेलनगरम्,
यमुनानगरम्।
तिथिः ..............

प्रियमित्र सोहन,

सप्रेम नमः

अत्र कुशलं तत्रास्तु। अमेरिकादेशे निवसन् अपि भवान् तत्रस्थानां भारतीयानां संघटनां विधातुं कृतप्रयत्नोऽस्ति इति विदित्वा मम चेतः अतीव प्रसीदति। अधुना तु ये जनाः विदेशान् गच्छन्ति ते स्वदेशं विस्मरन्ति इति अतीव दुःखावहः। विदेश–गतेषु जनेषु भारतीयसंस्काराणाम् अभिरुचिः नित्यं वर्धेत इति लक्ष्यं युष्माकं दृष्ट्वा अतीव सन्तोष जायते। आशासे यद् विदेशगतेषु जनेषु निजराष्ट्रहितं दुर्लक्ष्यं न भवेद् इति भावनां दृढ़ी करिष्यति।

भवदीयं मित्रम्,
राकेशः

## 13. स्वाध्याय–प्रगति–विषयकं भ्रात्रे पत्रम्

13, छात्रावासः,
राजकीयः महाविद्यालयः
सोनीपत–नगरम्।
तिथिः ............................

आदरणीय भ्रातः

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। भवदिच्छाम् अनुपालयन् अद्यऽहं भवते निजाध्ययनविषयकीं वार्तां लिखामि। गतमासे मया भवत्प्रेरणापत्रं लब्धम्। तदा प्रभृति अहं हृदयेन पठने संलग्नोऽस्मि। अधुनाऽहं प्रतिविषयं एकां होरां प्रतिदिनं ददामि। गृहकार्यं प्रतिदिनं पूर्णं करोमि। अधुनाऽहं सायंकाले एव एकहोरापर्यन्तं क्रीडाक्षेत्रं गच्छामि। मम अध्यापकाः अपि मम प्रगतिं दृष्ट्वा प्रसीदन्ति। भवता इदानीं मम चिन्ता न कार्या। भगवत्कृपया वार्षिक्यां परीक्षायाम् अहं प्रथमां श्रेणीम् अवश्यमेव अधिगमिष्यामि। मातृपितृभ्यां नमोनमः,

भवदीयः प्रियो भ्राता,
हिमांशुः।

**14. मातृनिधनशोकग्रस्तं मित्रं प्रति पत्रम्**

परीक्षाभवनम्,

रोहतक, हरियाणा।

तिथि : ..................

प्रियमित्रम्,

सप्रेम नमः।

तव पत्रे मातृपादानां निधनविषयिकीं दुःखद–वार्ताम् अधिगत्य अहम् अतीव दुःखितोऽस्मि। तव पितुः साम्प्रतं न जाने का दशा वर्तते ? भवान् न केवलम् आत्मानम् एव, अपितु पितरमपि समाश्वासयतु। प्रलापैः रोदनेन च न किमपि भवति। भगवान् पूज्य मातृ–पादेभ्यः सद्गतिम् प्रदद्यात्। युष्मभ्यम् च दुःखसहनक्षमतां दद्यात् इति प्रार्थना।

भवदीयं मित्रम्,

कर्णः।

**15. विद्यागौरवविषये भगिनीं प्रति पत्रम्**

5, शास्त्री नगरम्,

कुरुक्षेत्रम्।

तिथिः ...................

स्नेहमयि भगिनि,

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। अद्यैव तव पत्रं लब्धम्। अस्याम् अवस्थायामपि विद्यार्जने तव अरुचिं ज्ञात्वा अतीव दुःखं जातम्। विद्याध्ययने यत् कष्टं भवति तत् त्वया बहु मन्यते। त्वं विस्मरसि यत् जीवने सफलतां प्राप्तुम् अपठितस्य जनस्य भाग्ये शारीरिकश्रमः एव तिष्ठति। आधुनिकसमाजे अपठितः गौरवास्पदं लब्धुं नार्हति। अविद्वान् विद्वांसम् अनुगच्छति। सः समाजस्य नेतृत्वं कर्तुं न पारयति। अपठितः पदे पदे काठिन्यं भजते, तद् दूरीकर्तुं च विदुषां शरणम् अनुयाति। अतः भवता अध्ययनविषये कदापि उपेक्षा न करणीया। इति मे परामर्शः।

भवदीयः भ्राता,

श्यामः।

## 16. शैक्षणिक–पर्यटनार्थं अनुमतिहेतोः पित्रे पुत्रस्य पत्रम्

राजकीयः महाविद्यालयः

रोहतक–नगरम्

तिथि : ..............................

पूज्याः पितृमहोदयाः,

चरणवन्दना !

अत्र कुशलं तत्रास्तु। नम्र–निवेदनं अस्ति यत् अस्मिन् मासान्ते अवकाश–दिनेषु अस्माकं महाविद्यालयस्य शैक्षणिक–पर्यटनं काश्मीर–प्रदेशाय भविष्यति। तत्र मम कक्षायाः द्वादश छात्राः वरिष्टेन प्राध्यापकेन सह गमिष्यन्ति। यात्रा – व्ययः प्राचार्यमहोदेन स्वीकृतः। तस्मिन् प्रदेशे भ्रमणार्थं च ज्ञानार्थं मम महती आकांक्षा अस्ति। आशासे, भवान् एतदर्थं अनुमतिं प्रदाय अनुग्रहं करिष्यति।

भवदीयः आज्ञाकारी पुत्रः,

रामकुमारः।

## 17. धनलिप्सा दुःखदायिनी इति विषये मित्रं प्रति पत्रम्

33, सैक्टर–14

रोहतक।

तिथि : ..................

प्रियमित्र रजकराम !

सप्रेम नमः।

तव पत्रं प्राप्तम्। तव मानसिंक कष्टं ज्ञात्वा अहमपि चिन्तापरो जातः। त्वम् अर्थलाभाय दिवानिशं चेष्टमानः तिष्ठसि। यद्यपि तव निजः विस्तृतः आवासोऽस्ति यत्र फलवृक्षाः शाकार्थी भूमिश्च तिष्ठति। तव मासिकः आयोऽपि पंचाशत्–सहस्रं वर्तते। पुनरपि दिवानिशं कथं धनार्जने व्यापृतोऽसि। न त्वम् अधमर्णः। पुत्रास्ते कर्मकुशलाः आज्ञापराश्च। तदपि उत्तरोत्तरं कर्मवृद्धये चेष्टमानस्त्वं व्याकुलस्तिष्ठसि। लोभस्तु निरन्तो दुःखदायी च। सन्तोषं किंचिद् भज। तदैव त्वं शान्तः स्वस्थश्च स्थास्यसि। नान्यथा इदानीं तव पुत्राः अपि अर्जयन्ति इत्यतः संतोषो विधेयः। अर्थसंयमं कुरु। अन्यथा स्वास्थ्यहानेः आशंका। अस्तु, किमधिकं बुद्धिमत्सु ?

भवदीयं मित्रम्

हरीशः।

## 18. सखीं प्रति सख्याः पत्रम्

परीक्षाभवनम्।

तिथिः .............

अयि प्रियसखि !

सप्रेम नमः।

अत्र अहं कुशलिनी। भवत्याः बन्धूनां च कुशलं सम्भावयामि। शालायां मम विद्याप्रगतिः साधारणी अस्ति। भवत्याः अभ्यासः सम्यक् प्रचलति इति मन्ये। मम शालायां गतसप्ताहे विविधाः संस्कृतस्पर्धाः आसन्। तत्र अहं संस्कृत–आशुभाषणस्पर्धायां प्रथमपारितोषिकं प्राप्तवती। 'संस्कृतसम्भाषणस्य आवश्यकता' इति विषयः आसीत्। वार्षिकी परीक्षा सन्निहिता। अतः इतः परं सम्यक् अध्ययनं करणीयम्। भवती परीक्षासमनन्तरं मम गृहम् आगच्छतु। सर्वे मिलित्वा सन्तोषेण विरामं यापयाम।

भवत्याः पत्रं निरीक्षमाणा...

इति भवदीया सखी

सविता

## 19. पित्रे मातृस्वास्थ्यचिन्ताविषयकं पत्रम्

परीक्षाभवनम्।

तिथि : ...............

परमपूज्यानां पितृचरणानां पादयोः साष्टांग प्रणामाः।

अत्रं कुशलं तत्रास्तु। भवतां पत्रम् अधिगतम्। समाचारं ज्ञात्वा मनसि चिन्ता जाता यत् पूज्या मातृश्रीः गतषड्भिः दिनैः ज्वराक्रान्ता अस्ति। अहं मातृमहोदयां द्रष्टुम् इच्छामि परम अवकाशो नास्ति। वर्षस्य ममावकाशः पूर्वमेव समाप्ते वर्तते। कृपया मातृस्वास्थ्यविषये शीघ्रं लिख्यताम्। मम महती चिन्ता अस्ति। प्रभुकृपया सा शीघ्रं स्वास्था भवतु।

गृहे सर्वेभ्यः नमोनमः।

भवदाज्ञाकारी पुत्रः,

सिद्धार्थः।

## 20. प्रियमित्राय अभिनन्दनसूचकपत्रम्

परीक्षाभवनम्।

तिथिः .................

प्रियमित्र श्रीकान्त !

सप्रेम नमः।

भवतः विवाहामन्त्रणपत्रं प्राप्तम्। मया तत्र आगत्य अवश्यं सहाय्यं करणीयमासीत्। परं परीक्षा प्रचलति इति कारणतः विरामप्राप्तिः असाध्या जाता। क्षन्तव्यः अहम्। 'धन्यो गृहस्थाश्रमः।' भवान् गृहस्थाश्रमं प्राप्तवान् अस्ति। 'भवतः दाम्पत्यजीवनं सुखमयं शुभमयं च सत् सुदीर्घकालं तिष्ठतु' इति देवं प्रार्थयामि। भवान् एकदा पत्न्या सह मम गृहमागत्य अस्माकं आतिथ्यं स्वीकरोति इति भावयामि।

भवदीयं मित्रम्

हिमांशुः।

## 3.4 अपनी प्रगति जांचिए

1 पत्र की भाषा कैसी होनी चाहिए ?

2 पाण्डित्य–प्रदर्शन का प्रयत्न पत्र–लेखन में क्या उचित है ?

3 पत्र यथासम्भव कैसा होना चाहिए ?

4 घरेलू–पत्र किसे कहते हैं ?

5 'चिरंजीवी भव' किसके लिए प्रयोग करना चाहिए ?

## 3.5 सारांश

प्रस्तुत इकाई में सरल विषयों पर संस्कृत में पत्र दिए गए हैं। विषय–निरूपण के साथ–साथ निजी भावों के प्रदर्शन के लिए पत्र–लेखन एक सशक्त माध्यम है। पत्र चाहे किसी को भी लिखा गया हो, कम से कम शब्दों में अधिक से अधिक विचारों को व्यक्त करना चाहिए। अति संक्षिप्त भी पत्र नहीं लिखना चाहिए, अपितु सरल एवं सारयुक्त शैली में पत्र लिखने चाहिए। पत्रों में अनावश्यक विशेषणों का परित्याग करना चाहिए। पाण्डित्य–प्रदर्शन का प्रयत्न पत्र में अनुचित है, क्योंकि यह निबन्ध आदि का विषय है। पत्र की भाषा सरल तथा स्पष्ट होनी चाहिए। पत्र–लेखन में लेखक के व्यक्तित्व की छाप रहती है। अतः पत्र की भाषा में नम्रता एवं विनय का प्रदर्शन रहना चाहिए।

## 3.6 मुख्य शब्दावली

**प्रार्थना–पत्र** – किसी अधिकारी आदि को किसी कार्य को पूरा करने के लिए प्रार्थना करते हुए लिखे पत्र

**घरेलू–पत्र** – माता–पिता, भाई–बहन या अन्य सम्बन्धियों को लिखे पत्र

**भवदीयः** – मान्यवर महोदय का, आपका, तुम्हारा

**रुग्णावकाशार्थं** – बीमार हो जाने पर छुट्टी के लिए

**विद्यालयत्यागस्य प्रमाण हेतोः** – स्कूल छोड़ने का प्रमाण–पत्र लेने के लिए

## 3.7 अपनी प्रगति जांचिए के उत्तर

1 सरल और स्पष्ट

2 नहीं

3 संक्षिप्त

4 जो पत्र माता–पिता, भाई–बहन या अन्य सम्बन्धियों को लिखें जाते हैं।

5 अपने से छोटों के लिए

## 3.8 अभ्यास हेतु प्रश्न

1 पत्र लिखते समय कौन–कौन सी महत्त्वपूर्ण बातें याद रखनी चाहिए ?

2 सामान्य रूप से पत्र कितने प्रकार के होते हैं ? विवेचन कीजिए।

3 अपने से छोटों को पत्र लिखते समय उन्हें किस प्रकार सम्बोधित करना चाहिए ?

4 अवकाश के लिए आचार्य को एक प्रार्थना–पत्र लिखिए।

5 विवाह के प्रस्ताव को रोकने हेतु पिता को एक पत्र लिखिए।

## 3.9 आप ये भी पढ़ सकते हैं

1 सन्देशसंस्कृतम्, संस्कृतभारती, बेंगलूरु।

2 वाक्यव्यवहारः, सम्पाादकः – वेम्पटि कुटुम्बशास्त्री, राष्ट्रिय संस्कृतसंस्थानम्, नव देहली।

3 प्रौढ–रचनानुवादकौमुदी – डॉ० कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी।

4 बृहद्–अनुवाद–चन्द्रिका–चक्रधर नौटियाल 'हंस' शास्त्री, मोतीलाल बनारसीदास, दिल्ली।

5 संस्कृत स्वयं–शिक्षक – श्रीपाद दामोदर सातवलेकर, राजपाल एवं सन्ज, दिल्ली।